एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनं कृत्वा शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं कृत्वा आवरणपूजां विधाय धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं पञ्चलक्षजपः ॥१॥*॥ अस्याष्टाक्षरमन्त्रो यथा,—

"षडक्षरः शक्तिरुद्धः कथितोऽष्टाक्षरो मनुः ॥"

ह्रीं ॐ नमः शिवाय ह्रीं। अस्य पूजा। प्रातः-कृत्यादिशैवोक्तं पीठमन्त्वन्तं न्यासं विधाय ऋष्यादिन्यासकराङ्गन्यासान् प्राणायामञ्च कृत्वा ध्यायेत्।

"बन्धूकाभं त्रिनेत्रं शशिशकलधरं स्मेरवक्त्रं वहन्तं
हस्तैः शूलं कपालं वरदमभयदं चारुहासं भजामि।
वामोरुस्तम्भगायाः करतलविलसच्चारुरक्तोत्पलाया
हस्तेनाश्लिष्टदेहं मणिमयविलसद्भूषणायाः प्रियायाः ॥"

एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाह्य पञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजां कृत्वा धूपदानादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं चतुर्द्दशलक्षजपः ॥ २ ॥ * ॥ तस्याष्टाक्षरमन्त्रान्तरं यथा,—

"तारो माया वियद्बिन्दुमनुस्वारविभूषितम्।
पञ्चाक्षरसमायुक्तो वसुवर्णो मनुर्म्मतः ॥"

ॐ ह्रीं हौं नमःशिवाय। अस्य पूजा। प्रातः-कृत्यादिशैवोक्तपीठन्यासान्तं विधाय पूर्ववदृष्यादिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।

"वन्दे सिन्दूरवर्णं मणिमुकुटलसच्चारुचन्द्रावतंसं
भालोद्यन्नेत्रमीशं स्मितसुखकमलं दिव्यभूषाङ्गरागम्।
वामोरुन्यस्तपाणेररुणकुवलयं संदधत्याः प्रियाया-
श्चञ्चोत्तुङ्गस्तनाग्रे निहितकरतटं वेदटङ्केऽष्टहस्तम् ॥"

एवं ध्यात्वा मानसैः संपूज्यार्घ्यस्थापनं कृत्वा पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधाय आवरणपूजां कृत्वा धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणमष्टलक्षजपः ॥३॥ * ॥ अथास्य मृत्युञ्जयाख्यमन्त्रः।

"तारं स्थिरा सकर्णेन्दुर्भृगुः सर्गसमन्वितः।
त्र्यक्षरात्मा निगदितो मन्त्रो मृत्युञ्जयात्मकः॥"

ॐ जुं सः। अस्य पूजा। प्रातःकृत्यादिशैवोक्तपीठन्यासान्तं विधाय ऋष्यादिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।

"चन्द्रार्काग्निविलोचनं स्मितमुखं पद्मद्वयान्तःस्थितं
मुद्रापाशमृगाक्षसूत्रविलसत्पाणिं हिमांशुप्रभम्।
कोटीरेन्दुगलत्सुधाप्लुततनुं हारादिभूषोज्ज्वलं
कान्त्या विश्वविमोहनं पशुपतिं मृत्युञ्जयं भावये ॥"

एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कृत्वा पीठमन्वन्तां पीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं कृत्वा आवरणपूजां विधाय धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं लक्षत्रयजपः ॥४॥ * ॥ अथास्यापरद्वादशाक्षरमृत्युञ्जयमन्त्रः।

"मृत्युञ्जयं समुच्चार्य्य पालय द्वितयं वदेत्।
मृत्युञ्जयं समुच्चार्य्य पुनरेव विलोमतः ॥
द्वादशाक्षरोऽयं मन्त्रः स्यात् मृत्युञ्जयाभिधोऽपरः।"

ॐ जुं सः पालय पालय ॐ जुं सः। अस्य ध्यानपूजादिकं सर्वं पूर्ववत् ॥ ५ ॥ * ॥ अस्य द्वाविंशत्यक्षरमन्त्रः।

"प्रणवो हृदयं पश्चात् ततो भगवते पदम्।
ङेऽन्तञ्च दक्षिणामूर्त्तिं मह्यं मेधामुदीरयेत्।
प्रयच्छ ठद्वयान्तोऽयं द्वाविंशत्यक्षरो मनुः ॥"

ॐ नमो भगवते दक्षिणामूर्त्तये मह्यं मेधां प्रयच्छ स्वाहा। अस्य पूजा। प्रातःकृत्यादिशैवोक्तपीठमन्वन्तं विन्यस्य ऋष्यादिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।

"वटवृक्षं महोच्छ्रायं पद्मरागफलोज्ज्वलम्।
गारुत्मतमयैः पत्रैर्विचित्रैरुपशोभितम् ॥
नवरत्नमहाकल्पैर्लम्बमानैरलङ्कृतम्।
विचिन्त्य वटमूलस्थं चिन्तयेल्लोकनायकम् ॥
स्फटिकरजतवर्णं मौक्तिकीमक्षमाला-
ममृतकलसविद्याज्ञानमुद्राः कराब्जैः।
दधतमुरगकक्षं चन्द्रचूड़ं त्रिनेत्रं
विधृतविविधभूषं दक्षिणामूर्त्तिमीड़े ॥"

एवं ध्यात्वा मानसैः सम्पूज्य अर्घ्यस्थापनादिशैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजां कृत्वा धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं लक्षजपः ॥ ६ ॥ * ॥ अथास्य मन्त्रान्तरम्।

"अग्निसम्वर्त्तकादित्यरानिलो षष्ठबिन्दुमत्।
चिन्तामणिरिति ख्यातं बीजं सर्व्वसमृद्धिदम्॥"

र-क्ष म र य-औ ऊं ॥ प्रपञ्चसारे।

"अनलक-य-मरेफ-प्राणसत्यान्तवाम-
श्रुतिहिमरुचिखण्डैर्मण्डितो मन्त्रराजः।"

अस्य पूजा। प्रातःकृत्यादिशैवोक्तपीठमन्वन्तं विन्यस्य ऋष्यादिन्यासं कराङ्गन्यासौ च कृत्वा ध्यायेत्।

"नीलप्रवालरुचिरं विलसत्त्रिनेत्रं
पाशारुणोत्पलकपालकशूलहस्तम्।
अर्द्धाम्बिकेशमनिशं प्रविभक्तभूषं
बालेन्दुबद्धमुकुटं प्रणमामि रूपम् ॥"

एवं ध्यात्वा मानसैः संपूज्यार्घ्यं संस्थाप्य शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं कृत्वा आवरणपूजां विधाय धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं लक्षजपः। अयं अर्द्धनारीश्वरः ॥ ७ ॥ * ॥

"पार्श्वो वह्निसमारूढ़स्तारवामाद्यमीरितम्।
धान्तो वह्निसमारूढ़स्तूर्य्यस्वरसमन्वितः ॥
बिन्दुमांस्तु द्वितीयः स्यात् टान्तः सर्गी तृतीयकः।
नीलकण्ठात्मको मन्त्रो विषहृद्ययहरः परः ॥"

प्रमाणान्तरम्।

"लोहितोऽम्यासनः सत्यो बिन्दुमान् प्रथ पुनः।
द्वितीया वह्निबीजस्था दीर्घा शान्तीन्दुभूषिता॥
तृतीया लाङ्गली सर्गी मन्त्रो बीजत्रयात्मकः।
नीलकण्ठात्मको मन्त्रो विषहृद्ययहरः परः ॥"

प्रों न्रीं ठः इति मन्त्रः। अस्य पूजा। प्रातः कृत्यादिशैवोक्तपीठन्यासान्तं कृत्वा ऋष्यादिन्यासं कराङ्गन्यासौ च विधाय ध्यानं कुर्य्यात्।

"बालार्कायुततेजसं धृतजटाजूटेन्दुखण्डोज्ज्वलं
नागेन्द्रैः कृतशेखरं जपवटीं शूलं कपालं करैः।
खट्वाङ्गं विधृतं त्रिनेत्रविलसत्पञ्चाननं सुन्दरं
व्याघ्रत्वक्परिधानमब्जनिलयं श्रीनीलकण्ठं भजे ॥"

एवं ध्यात्वा मानसैः संपूज्य अर्घ्यस्थापनादिशैवोक्तपीठपूजां विधाय पुनर्ध्यात्वा आवाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं कृत्वा आवरणपूजां विधाय धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्। अस्य पुरश्चरणं त्रिलक्षजपः। अयं नीलकण्ठः ॥८॥*॥ अस्याष्टाक्षरमन्त्रो यथा—

"तारो हृन्नीलकण्ठाय मन्त्रश्चाष्टाक्षरः परम्।

ॐ नमो नीलकण्ठाय। अस्य पूजादिकं सर्व्वं पूर्व्ववत् ॥ ९ ॥ * ॥ अस्य पञ्चाक्षरमन्त्रः षडक्षरमन्त्रश्च यथा,—

"हृदयं सपरं साक्षिन् लान्तोऽनन्तान्वितो मरुत्।
पञ्चाक्षरो मनुः प्रोक्तस्ताराद्योऽयं षडक्षरः ॥"

नमः शिवाय। ॐ नमः शिवाय। अस्य पूजा। प्रातःकृत्यादिशैवोक्तपीठमन्वन्तं न्यासं विधाय ऋष्यादिन्यासं कुर्य्यात्। ततो मूर्त्तिन्यासः। ततः कराङ्गन्यासौ। ततो गोलकन्यासः। ततो व्यापकन्यासं प्राणायामञ्च कृत्वा ध्यायेत्।

"ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम्।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववीजं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥"

एवं ध्यात्वा मानसैः सम्पूज्यार्घ्यस्थापनं कृत्वा शैवोक्तपीठपूजां विधाय पुनर्ध्यात्वावाहनादिपञ्चपुष्पाञ्जलिदानपर्य्यन्तं विधायावरणपूजां कृत्वा धूपादिविसर्ज्जनान्तं कर्म्म समापयेत्।